# Shri Mahalakshmi stavakavachapuja

# શ્રીમહાલક્ષ્મીસ્તવકવચપૂજા

## Document Information

Text title : mahAlakShmIstavakavachapUjA

File name : mahAlakShmIstavakavachapUjA.itx

Category : kavacha, devii, lakShmI, devI, stava, brahmavaivartapurANa

Location : doc_devii

Transliterated by : Kirk Wortman kirkwort at hotmail.com

Proofread by : Kirk Wortman kirkwort at hotmail.com

Description-comments : brahmavaivartamahApurANe gaNapatikhaNDe adhyAya 22

Latest update : January 18, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# શ્રીમહાલક્ષ્મીસ્તવકવચપૂજા

શ્રીગણેશાય નમઃ ।

નારદ ઉવાચ ।
આવિર્ભૂય હરિસ્તસ્મૈ કિં સ્તોત્રં કવચં દદૌ ।
મહાલક્ષ્મ્યાશ્ચ લક્ષ્મીશસ્તન્મે બ્રૂહિ તપોધન ॥ ૧॥

નારાયણ ઉવાચ ।
પુષ્કરે ચ તપસ્તપ્ત્વા વિરરામ સુરેશ્વરઃ ।
આવિર્બભૂવ તત્રૈવ ક્લિષ્ટં દૃષ્ટ્વા હરિઃ સ્વયમ્ ॥ ૨॥

તમુવાચ હૃષીકેશો વરં વૃણુ યથેપ્સિતમ્ ।
સ ચ વવ્રે વરં લક્ષ્મીમીશસ્તસ્મૈ દદૌ મુદા ॥ ૩॥

વરં દત્ત્વા હૃષીકેશઃ પ્રવક્તુમુપચક્રમે ।
હિતં સત્યં ચ સારં ચ પરિણામસુખાવહમ્ ॥ ૪॥

મધુસૂદન ઉવાચ ।
ગૃહાણ કવચં શક્ર સર્વદુઃખવિનાશનમ્ ।
પરમૈશ્વર્યજનકં સર્વશત્રુવિમર્દનમ્ ॥ ૫॥

બ્રહ્મણે ચ પુરા દત્તં વિષ્ટપે ચ જલપ્લુતે ।
યદ્ધૃત્વા જગતાં શ્રેષ્ઠઃ સર્વૈશ્વર્યયુતો વિધિઃ ॥ ૬॥

બભૂવુર્મનવઃ સર્વે સર્વૈશ્વર્યયુતા યતઃ ।
સર્વૈશ્વર્યપ્રદસ્યાસ્ય કવચસ્ય ઋષિર્વિધિઃ ॥ ૭॥

પઙ્ક્તિશ્છન્દશ્ચ સા દેવી સ્વયં પદ્માલયા વરા ।
સિદ્ધ્યૈશ્વર્યસુખેષ્વેવ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૮॥

યદ્ધૃત્વા કવચં લોકઃ સર્વત્ર વિજયી ભવેત્ ।
મસ્તકં પાતુ મે પદ્મા કણ્ઠં પાતુ હરિપ્રિયા ॥ ૯॥

નાસિકાં પાતુ મે લક્ષ્મીઃ કમલા પાતુ લોચને ।
કેશાન્કેશવકાન્તા ચ કપાલં કમલાલયા ॥ ૧૦॥

જગત્પ્રસૂર્ગણ્ડયુગ્મં સ્કન્ધં સમ્પત્પ્રદા સદા ।
ૐ શ્રીં કમલવાસિન્યૈ સ્વાહા પૃષ્ઠં સદાઽવતુ ॥ ૧૧॥

ૐ હ્રીં શ્રીં પદ્માલયાયૈ સ્વાહા વક્ષઃ સદાઽવતુ ।
પાતુ શ્રીર્મમ કઙ્કાલં બાહુયુગ્મં ચ તે નમઃ ॥ ૧૨॥

ૐ હ્રીં શ્રીં લક્ષ્મ્યૈ નમઃ પાદૌ પાતુ મે સન્તતં ચિરમ્ ।
ૐ હ્રીં શ્રીં નમઃ પદ્માયૈ સ્વાહા પાતુ નિતમ્બકમ્ ॥ ૧૩॥

ૐ શ્રીં મહાલક્ષ્મ્યૈ સ્વાહા સર્વાઙ્ગં પાતુ મે સદા ।
ૐ હ્રીં શ્રીં ક્લીં મહાલક્ષ્મ્યૈ સ્વાહા માં પાતુ સર્વતઃ ॥ ૧૪॥

ઇતિ તે કથિતં વત્સ સર્વસમ્પત્કરં પરમ્ ।
સર્વૈશ્વર્યપ્રદં નામ કવચં પરમાદ્ભુતમ્ ॥ ૧૫॥

ગુરુમભ્યર્ચ્ય વિધિવત્કવચં ધારયેત્તુ યઃ ।
કણ્ઠે વા દક્ષિણે બાહૌ સ સર્વવિજયી ભવેત્ ॥ ૧૬॥

મહાલક્ષ્મીર્ગૃહં તસ્ય ન જહાતિ કદાચન ।
તસ્યચ્છાયેવ સતતં સા ચ જન્મનિ જન્મનિ ॥ ૧૭॥

ઇદં કવચમજ્ઞાત્વા ભજેલ્લક્ષ્મીં સ મન્દધીઃ ।
શતલક્ષપ્રજાપેઽપિ ન મન્ત્રઃ સિદ્ધિદાયકઃ ॥ ૧૮॥

નારાયણ ઉવાચ ।
દત્ત્વા તસ્મૈ ચ કવચં મન્ત્રં વૈ ષોડશાક્ષરમ્ ।
સન્તુષ્ટશ્ચ જગન્નાથો જગતાં હિતકારણમ્ ॥ ૧૯॥

ૐ હ્રીં શ્રીં ક્લીં નમો મહાલક્ષ્મ્યૈ સ્વાહા ।
દદૌ તસ્મૈ ચ કૃપયા ચેન્દ્રાય ચ મહામુને ॥ ૨૦॥

ધ્યાનં ચ સામવેદોક્તં ગોપનીયં સુદુર્લભમ્ ।
સિદ્ધૈર્મુનીન્દ્રૈર્દુષ્પ્રાપ્યં ધ્રુવં સિદ્ધિપ્રદં શુભમ્ ॥ ૨૧॥

શ્વેતચમ્પકવર્ણાભાં શતચન્દ્રસમપ્રભામ્ ।
વહ્નિશુદ્ધાંશુકાધાનાં રત્નભૂષણભૂષિતામ્ ॥ ૨૨॥

ઈષદ્ધાસ્યપ્રસન્નાસ્યાં ભક્તાનુગ્રહકારિકામ્ ।

કસ્તૂરીબિન્દુમધ્યસ્થં સિન્દૂરં ભૂષણં તથા ॥ ૨૩॥

અમૂલ્યરત્નરચિતકુણ્ડલોજ્જ્વલભૂષણમ્ ।
બિભ્રતી કબરીભારં માલતીમાલ્યશોભિતમ્ ॥ ૨૪॥

સહસ્રદલપદ્મસ્થાં સ્વસ્થાં ચ સુમનોહરામ્ ।
શાન્તાં ચ શ્રીહરેઃ કાન્તાં તાં ભજેજ્જગતાં પ્રસૂમ્ ॥ ૨૫॥

ધ્યાનેનાનેન દેવેન્દ્રો ધ્યાત્વા લક્ષ્મીં મનોહરામ્ ।
ભક્ત્યા સમ્પૂજ્ય તસ્યૈ ચ ચોપચારાંસ્તુ ષોડશ ॥ ૨૬॥

સ્તુત્વાઽનેન સ્તવેનૈવ વક્ષ્યમાણેન વાસવ ।
નત્વા વરં ગૃહીત્વા ચ લભિષ્યસિ ચ નિર્વૃતિમ્ ॥ ૨૭॥

સ્તવનં શ ૃણુ દેવેન્દ્ર મહાલક્ષ્મ્યાઃ સુખપ્રદમ્ ।
કથયામિ સુગોપ્યં ચ ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૨૮॥

નારાયણ ઉવાચ ।
દેવિ ત્વાં સ્તોતુમિચ્છામિ ન ક્ષમાઃ સ્તોતુમીશ્વરાઃ ।
બુદ્ધેરગોચરાં સૂક્ષ્માં તેજોરૂપાં સનાતનીમ્ ।
અત્યનિર્વચનીયાં ચ કો વા નિર્વક્તુમીશ્વરઃ ॥ ૨૯॥

સ્વેચ્છામયીં નિરાકારાં ભક્તાનુગ્રહવિગ્રહામ્ ।
સ્તૌમિ વાઙ્મનસોઃ પારાં કિંવાઽહં જગદમ્બિકે ॥ ૩૦॥

પરાં ચતુર્ણાં વેદાનાં પારબીજં ભવાર્ણવે ।
સર્વસસ્યાધિદેવીં ચ સર્વાસામપિ સમ્પદામ્ ॥ ૩૧॥

યોગિનાં ચૈવ યોગાનાં જ્ઞાનાનાં જ્ઞાનિનાં તથા ।
વેદાનાં વૈ વેદવિદાં જનનીં વર્ણયામિ કિમ્ ॥ ૩૨॥

યયા વિના જગત્સર્વમબીજં નિષ્ફલં ધ્રુવમ્ ।
યથા સ્તનન્ધયાનાં ચ વિના માત્રા સુખં ભવેત્ ॥ ૩૩॥

પ્રસીદ જગતાં માતા રક્ષાસ્માનતિકાતરાન્ ।
વયં ત્વચ્ચરણામ્ભોજે પ્રપન્નાઃ શરણં ગતાઃ ॥ ૩૪॥

નમઃ શક્તિસ્વરૂપાયૈ જગન્માત્રે નમો નમઃ ।
જ્ઞાનદાયૈ બુદ્ધિદાયૈ સર્વદાયૈ નમો નમઃ ॥ ૩૫॥

હરિભક્તિપ્રદાયિન્યૈ મુક્તિદાયૈ નમો નમઃ ।

સર્વજ્ઞાયૈ સર્વદાયૈ મહાલક્ષ્મ્યૈ નમો નમઃ ॥ ૩૬॥

કુપુત્રાઃ કુત્રચિત્સન્તિ ન કુત્રાપિ કુમાતરઃ ।
કુત્ર માતા પુત્રદોષં તં વિહાય ચ ગચ્છતિ ॥ ૩૭॥

સ્તનન્ધયેભ્ય ઇવ મે હે માતર્દેહિ દર્શનમ્ ।
કૃપાં કુરુ કૃપાસિન્ધો ત્વમસ્માન્ભક્તવત્સલે ॥ ૩૮॥

ઇત્યેવં કથિતં વત્સ પદ્માયાશ્ચ શુભાવહમ્ ।
સુખદં મોક્ષદં સારં શુભદં સમ્પદઃ પ્રદમ્ ॥ ૩૯॥

ઇદં સ્તોત્રં મહાપુણ્યં પૂજાકાલે ચ યઃ પઠેત્ ।
મહાલક્ષ્મીર્ગૃહં તસ્ય ન જહાતિ કદાચન ॥ ૪૦॥

ઇત્યુક્ત્વા શ્રીહરિસ્તં ચ તત્રૈવાન્તરધીયત ।
દેવો જગામ ક્ષીરોદં સુરૈઃ સાર્ધં તદાજ્ઞયા ॥ ૪૧॥

॥ ઇતિ શ્રીબ્રહ્મવૈવર્તમહાપુરાણે ગણપતિખણ્ડે
નારદનારાયણસંવાદે લક્ષ્મીસ્તવકવચપૂજાકથનં
નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૨૨॥

Encoded and proofread by Kirk Wortman kirkwort at hotmail.com

---

*Shri Mahalakshmi stavakavachapuja*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*